Checked 2013
कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह
दाखल क्र M 2030 विषय पूजा विधी
नाव. पार्थिवेश्वर पूजाविधी
लेखक/लिपीकार —
पृष्ठ 15 काळ — पूर्ण/अपूर्ण

श्रीगणेशाय नमः ॥ श्रीशिवाय नमः । श्रीगुरुभ्यो नमः ॥
अथ पार्थिवेश्वर पूजाविधिर्लिख्यते ॥ आदौ नि
त्य स्नानं विधाय ॥ संध्यावंदनादि नित्यकर्म स
माप्य ॥ आचमन प्राणायामं ॥ गणपतिस्मरणं ॥
सुमुखश्चैकदंतश्च द्वादश नामानि उच्चार्य ॥ देशका
अत्राद्य पुण्य पवित्र मासोत्तम मासे अमुक पक्षे
अमुक तिथौ अमुक वासरे अमुक नक्षत्रे अमु
क योग करण मुहूर्त लग्न एवं गुण विशे
षण विशिष्टायां तिथौ पुण्य० ॥ परम पवित्र मम पार्थि

रक्षोहणो वो बलगहनः प्रोक्षामि वैष्णवान् ०॥२॥ दक्षि
वेश्वर यथालब्धोपचारैः यथाशक्त्या यथासंभा
कान्नि पूजनाद्यर्चनमहं करिष्ये । ॐ [illegible] ॥ अथ
दिग्बंधः ॥ रक्षोहणं वलगहनं वैष्णवी० ॥१॥ पू
र्वे दिग्बंधनं ॥ रक्षसां भागोसि निरस्तं रक्ष इद
महं रक्षोभितिष्ठामीदमहं रक्षोवबाधऽइद
महं रक्षोधमं तमो नयामि ॥३॥ पश्चिमे दिग्बं
धनं ॥ रक्षोहा विश्वचर्षणिरभियोनिमहे योते ॥
द्रोणे सधस्थमासदत् ॥४॥ उत्तरे दिग्बंधनं ॥

दि ग्बंध नं ४

अपसर्पंतु ये भूता ये भूता भूमिसंस्थिता ये भूता
विघ्नकर्त्तारस्ते नश्यंतु शिवाज्ञया ॥ अपक्रामंतु
भूतानि पिशाचाः सर्वतो दिशं सर्वेषामविरोधे
न ब्रह्मकर्मसमाचरेत् ॥ ऊर्ध्वतालत्रयं वामपा
देन वामपार्ष्णिना ॥ भूमौ घातत्रयं ॥ आचमनं ॥ ॐ
पृथ्वीति मेरुपृष्ठऋषिः सुतलछंदः कूर्मोदेव
ता आसने विनियोगः ॥ ॐ पृथ्वी त्वया धृता लोका
देवि त्वं विष्णुना धृता । त्वं च धारय मां देवि प

२

वित्रं कुरु चासनं ॥ आत्मासनाय नमः ॥ पद्माय
नमः ॥ पद्मासनाय नमः ॥ चित्शक्त्यै नमः ॥ अनं
ताय नमः ॥ कूर्माय नमः ॥ धर्माय नमः ॥ ज्ञानाय नमः ॥
विराग्याय नमः ॥ मायाशक्त्यै नमः ॥ इत्यासनं सं
स्कृत्य ॥ अथ भस्मशुद्धिः ॥ ॐ भस्मसीत्यस्य प्रजापतिऋ
षिः प्रस्तारपंक्तिछंदः स्व[illegible] देवता भस्मशु
द्धौ विनियोगः ॥ भस्मोहस्तं दत्वा तथा हृदये हस्तं दत्वा
जपः ॥ ॐ भस्मसि भूमिरस्यदितिरसि विश्वधाया वि
श्वस्य भुवनस्य धत्री ॥ पृथिवी यच्छ पृथिवीं दृं[illegible]

रुप पृथिवी मा हिं सीः ॥ यो भूतानामिति कौंडिन्य ऋ
षिस्त्रिष्टुप् छंदः नारायणो देवता कैरवनम स्कारे
विनियोगः ॥ उं ये भूताना मधिपति यस्मिं ल्लोका अ
धिश्रिताः ॥ य ईशे महतो महांस्तेन गृह्णामि त्वा महं
मयि गृह्णामि महम् ॥ क्षेत्राधिपतये नमः ॥ भूता
य कैरवाय नमः ॥ सशैल सागरं ध्यं धीय धात्कस्मा
ण्य पिरसीत धासा व कुलोएां सपत्स पर्वि लिः
सदा ॥ धनदाये नमः ॥ पृथिव्यै नमः ॥ सप्त द्वीपा
वती वसुंधराये नमः ॥ सप्त समुद्र सहिताये

२

धरित्र्यै नमः ॥ इदमत्र चंदनं पुष्पं ॥ सदा गोच मे
मात्रे स्थंडिले अनुज्ञा न दातु मर्हसि ॥ अप स्तम्भ
द्भिः ॥ ततो ध्येय पा स्थितो यो सो हृदये दीप वत्प्रभुः ॥
धारये त्तत्र चात्मानं धारणां धारयन्बुधः ॥ द्वा सप्त
ति स हस्राणि हृदया दभि नि स्सृताः ॥ हितानाम
हितानाड्य स्तासां मध्ये शशि प्रभं मंडलं तन्म
ध्य स्थमात्मा दीपइ वाचलः ॥ संज्ञेय स्तं विदित्वे
ह पुनरा जायते नउ ॥ इति न्येत स्मृद्धिः ॥ अथ
रूप श्री प्राण प्रतिष्ठा मंत्रस्य ब्रह्मा विष्णु महे

मा

ऋषयः ऋग्यजुःसामानि छंदांसि क्रियामयवपुः प्राणशक्ति
देवता प्राणप्रतिष्ठापने विनियोगः॥ ॐ आं ह्रीं क्रों यं रं
लं वं शं षं सं हं सः मम प्राणा इह प्राणाः॥ ॐ आं ह्रीं क्रों यं
रं लं वं शं षं सं हं सः मम जीव इह स्थिताः॥ ॐ आं ह्रीं क्रों यं रं
लं वं शं षं सं हं सः मम सर्वेंद्रियाणि वाङ्मनश्चक्षुःश्रोत्र
त्वक्जिह्वाघ्राणपाणिपादपायूपस्थ इहैवागत्य इहतायां
तु सुखेन चिरं तिष्ठतु स्वाहा॥ ततः षोडशसंस्कारसिद्ध्य
र्थं षोडशवारं प्रणवजपः कार्यः॥ आचमनं प्राणायामं॥
अथ विभूतिधारणं॥ सद्योपंचब्रह्ममंत्रैः परिगृह्य॥ मा

४

नस्तोके तनये इति जलं॥ मानो महांतमित्यालोडनं॥ त्र्यंबकमि
ति आमंत्र्य॥ त्र्यायुषं इति मंत्रेण ललाटे हृदये स्कंधयोर्ग्रीवायां
कंठे कूर्परे मणिबंधे ब्रह्मरंध्रे नाभौ कक्षयोः कुक्षौ विभूतिधा
रणं॥ अथ न्यासाकारः॥ ललाटे ॐ नमः शिवाय॥ हृदये
हव्यवाहनाय नमः॥ नाभौ स्कंदाय नमः॥ कुक्षौ विश्वरू
पाय नमः॥ कुक्षौ विरूपाय नमः॥ दक्षिणभुजे रुद्राय न
मः॥ तन्मणिबंधे आदित्याय नमः॥ तत्कूर्परे सोमाय न
मः॥ वामभुजे वामनाय नमः॥ तन्मणिबंधे प्रलंबनाय नमः॥
तत्कूर्परे वसुभ्यो नमः॥ पृष्ठे हराय नमः॥ स्कंधयोः शिवाय

नमः॥ अग्नौ वायौ नीलकंठाय नमः॥ ब्रह्मांडे ब्रह्माणे न
मः॥ सर्वांगे सदा शिवाय नमः॥ अथ रुद्राक्षधारणं॥ ॐ
घोरे ह्रुं ह्रैं अघोरतरे ह्रुं ह्रां नमस्ते रुद्ररूपे ह्रुं स्वाहा॥ अने
न मंत्रेण रुद्राक्षमालां धारयेत्॥ त्र्यंबकमंत्रेण वा पंचा
क्षरमंत्रेण रुद्राक्षमालां धारयेत्॥ विना मंत्रेण यो धत्ते रुद्रा
क्षं भुवि मानवः॥ स याति नरकान् घोरान् यावदिंद्राश्च
तुर्दश॥ विना नाम्ना त्रिपुंड्रेण विना रुद्राक्षमालया॥ पूजि
तोपि महादेवो न स्यात्तस्य फलप्रदः॥ इति रुद्राक्षधारणं॥
अथ शुद्धोदकेन अर्घ्यं धारणं तन्मध्ये गंधाक्षतान् पुष्पाणि

प्रक्षिप्य॥ अंकुशमुद्रया सर्वाणि तीर्थान्यावाहयेत्॥
तत्र मंत्रः॥ ॐ इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं
सचता परुष्ण्या॥ असिक्न्या मरुद्वृधे वितस्तयार्जीकी
ये शृणुह्या सुषोमया॥ १॥ गंगे च यमुने चैव गोदाव
री सरस्वति॥ नर्मदे सिंधुकावेरी जलेस्मिन् संनिधिं
कुरु॥ धेनुमुद्रां प्रदर्शनं॥ अवगुंठनेन अवगुंठय॥
अस्त्रेण संरक्ष्य॥ अमृतीकरणं॥ तज्जलेन पूजोपकर
णं प्रोक्षणं॥ ॐ अस्य श्रीपार्श्वचिंतामणिविद्यामं
त्रस्य ब्रह्मा ऋषिः गायत्री छंदः श्रीआश्रीदावरस्वरूपी

कामदुघा देवता ह्रौं बीजं ह्रीं शक्तिर्नाम कीलकं ममाभी
ष्ट सिध्यर्थं पूजने विनियोगः॥ ॐ ह्रौं ह्रीं सर्वज्ञाय शिवा
य अंगुष्ठाभ्यां नमः॥ ॐ ह्रौं ह्रीं सर्वतृप्ति शिवाय तर्जनीभ्यां
नमः॥ ॐ ह्रौं ह्रीं अनादि बोध शिवाय मध्यमाभ्यां नमः॥
ॐ ह्रौं ह्रीं स्वतंत्र ज्ञाय शिवाय तर्जनीभ्यां नमः॥ ॐ
ह्रौं ह्रीं नित्यमलुप्त शिवाय कनिष्टकाभ्यां नमः॥ ॐ
ह्रौं ह्रीं अनंतशक्ति शिवाय करतलपृष्टाभ्यां नमः॥
ॐ ह्रौं ह्रीं सर्वज्ञाय शिवाय हृदयाय नमः॥ ॐ ह्रौं ह्रीं स
र्वतृप्ति शिवाय शिरसे स्वाहा॥ ॐ ह्रौं ह्रीं अनादि बोध

६

शिवाय शिखायै वौषट्॥ ॐ ह्रौं ह्रीं स्वतंत्रज्ञाय शिवा
य कवचाय हुं॥ ॐ ह्रौं ह्रीं नित्यमलुप्त शिवाय नेत्रत्र
याय वौषट्॥ ॐ ह्रौं ह्रीं अनंतशक्ति शिवाय अस्त्राय
फट्॥ ॐ नकारादीनां पंचाक्षराणां गौतमात्रि वि
श्वामित्रांगिरा भरद्वाज ऋषयः॥ गायत्र्युष्णिगनुष्टु
प्जगती छंदांसि ब्रह्म विष्णु रुद्र ईश स्कंदादयो दे
वताः पीतसीत रक्त धूम्र श्वेतवर्णाः मम पार्थिवेश्व
र पूजने विनियोगः॥ ताम्रपात्रे अर्घस्थापनं तन्मध्ये
गंधाक्षतान् पुष्प दीप फल दूर्वा रंभा तिलाक्षतान् पत्रे दि

प्री ३

च्य॥ तत्पात्रहस्तो गृहीत्वा ॐ घृणिः सूर्य आदित्य श्रीं इ
ति सूर्यार्घ्यदानं॥ आगच्छ सर्वकल्याणी वसुधे लोक
धारिणि॥ पृथ्वी ब्रह्मसदत्तासि काश्यपेनाभिवंदिता
॥ भूम्यै नमः॥ इति भूमिपूजनं॥ उद्धृतासि वराहेण
कृष्णेन शतबाहुना॥ इंद्राये लीलया पादे विष्णुना धृ
ता मामभ्यहं॥ मा वो रिषत्खनिता यस्मै चाहं खनामि
वः द्विपाच्चतुष्पादस्माकं सर्वमस्त्वनातुरम्॥ पृथि
व्याः सधस्थादग्निं पुरीष्यमंगिरस्वत् खनामसि॥ अ
नेन मंत्रेण खनं॥ येषां पंथा पथिरक्षयः॥ इति मृदानयं॥ १
ताम्रपात्रे कृत्वा॥ नमो गणेभ्यो॥ इति मृदा मंत्र॥ शुद्धो

निधाय
कृतं १

दकं आसिंच्य पिंडीकृत्य॥ किंचित्सदा गुटिकार्थे स्थापणी
यं॥ ॐ ह्रौं ह्रीं जूं सः ॐ हराय नमः मृदाहरणं॥ ॐ ह्रौं ह्रीं
जूं सः महेश्वराय नमः संघट्टनं॥ ॐ ह्रौं ह्रीं जूं सः ॐ सं
जवे नमः स्थापनं॥ अथ गुटिकाकरणं पंच॥ ॐ ह्रीं गं
ग्लौं गणपतये ह्रीं गं ग्लौं॥ इति गणपतिमंत्रः॥ ॐ ऐं
हुं ह्रं ह्रीं कुमाराय नमः॥ इति स्वामिकुमारमंत्रः॥ ई
श्वरात् ईशान्ये गणपति स्वामिकुमार स्थापनं॥ वामे
पंच गुटिका स्थापनं॥ ततः शिवोपरि दक्षिणे हस्तं
दत्वा प्राणप्रतिष्ठां कुर्यात् तन्मंत्र॥ ॐ अस्य श्री प्राण

प्रतिष्ठामंत्रस्य । प्राणप्रतिष्ठाजपे विनियोगः
ॐ कं खं गं घं ङं अं पृथिव्यप्तेजोवाय्वाकाशा
त्मने आं हृदयाय नमः ॥ ॐ चं छं जं झं ञं इं श
ब्दस्पर्शरूपरसगंधात्मने ईं शिरसे स्वाहा ॥ ॐ
टं ठं डं ढं णं उं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणा
त्मने ऊं शिखायै । ॐ तं थं दं धं नं एं वाक्पाणि
पादपायूपस्थात्मने ऐं कवचाय हुं । ॐ पं फं बं
भं मं ओं वचनादानगमनविसर्गात्मने औं ने
त्रत्रयाय । ॐ यं रं लं वं शं षं सं हं ळं क्षं अं मनोबु

८

बुद्ध्यहंकारचित्तात्मने अः अस्त्राय फट् ॥ ॐ आं ह्रीं
क्रौं यं रं लं वं शं षं सं हं सः ॥ ॐ ह्रौं ह्रीं जूं सः ॥ शूलपाणे न
मः शूलपाणे शिवाय सांगपरिवाराय ८ प्राणा इह प्राणाः
॥ ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः ॐ शूलपाणे नमः
शूलपाणिने शिवाय सांगसपरिवाराय जीव इह स्थितः ॥
ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः ॐ शूलपाणे नमः शू
लपाणे शिवाय सांगपरिवारास्य सर्वेंद्रियाणि वाङ्म
नश्चक्षुःश्रोत्रत्वक् जिह्वा घ्राणपादपायूपस्थ इहा
गत्य स्वस्ति सुखं चिरं तिष्ठंतु स्वाहा ॥ ॐ शूलपाणे नमः
शूलपाणे शिवाय सांगसपरिवाराय सुप्रतिष्ठितोन

स

च॥ इति प्राणप्रतिष्ठा॥ ॐ ह्रौं ह्रीं जूं सः पिनाकधृषे नमः
आवाहनं॥ पिनाकधृषे। शिवाय सांगाय सपरिवाराय आवा
हितो भव॥ ॐ ह्रौं ह्रीं जूं सः ॐ पशुपतये नमः इति ध्यानं॥
ॐ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतं
सं रत्नाकल्पोज्वलांगं परशुमृगवराभीतिहस्तं प्रस
न्नं॥ पद्मासीनं समंतात्स्तुतममरगणैर्व्याघ्रकृत्तिं व
सानं विश्वाद्यं विश्ववंद्यं निखिलभयहरं पंचवक्त्रं त्रि
नेत्रं॥ स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकं॥ ए
तावत्त्वं प्रीतिभावेन लिंगेस्मिन् सन्निधिं कुरु॥१॥
सांग ॐ ह्रौं ह्रीं जूं सः ॐ नमः शिवाय सपरिवाराय आस

नं पाद्यं अर्घ्यं आचमनं स्नानं॥ ॐ पयः पृथिव्यां पय० इति
पयस्नानांते वरुणस्नानं॥ ॐ वरुणस्योत्तं० नमः॥
स्नानांते आचमनं सर्वत्र॥ ॐ नमः शिवाय सांगसप
रिवाराय वरुणस्नानांते दधिस्नानं॥ ॐ दधिक्राव्णो०
दधिस्नानांत वरुणस्नानं॥ ॐ नमः शिवाय वरुण
स्नानं॥ ॐ घृतं घृतपावानः॥ ॐ नमः शिवाय घृतस्ना
नांते वरुणस्नानं॥ वरुणस्नानांते मधुस्नानं॥ मधु
वाता ऋतायते० पा॥ ॐ शिवाय मधुस्नानांत वरुणस्नानं
वरुणस्नानांते शर्करास्नानं॥ अपांरसमुद्वयस०॥ ॐ
ॐ शिवाय शर्करास्नानांते। वरुणस्नानं। वरुणस्योत्तं नमः॥

वरुणस्नानांते शुद्धोदकस्नानं॥ पंचनद्यः सरस्वती।०।
शुद्धोदकस्नानांते आचमनं॥ ॐ ह्रौं ह्रीं हूं सः ॐ नमः शिवा
यसांगसपरिवाराय चंदनं॥ अनेन मंत्रेण गंधाक्षतपु
ष्पबिल्वपत्रतिलादतविस्तृतिं समर्पयामि॥ अथ
पंचवक्त्रपूजा॥ ॐ सद्योजातमिति पादान्यां पश्चि
मवक्त्रायनमः॥ ॐ सद्योजातऋषिः उपरिष्टाद्बृह
तीछंदः ब्रह्मादेवता कपिलोवर्णः पश्चिमादिक्
पृथिवीतत्वो परहंसवाहनाय हौं बीजायब्रह्मस्व
रूपायस्वं शिरस्तूपात्मने ब्रह्मणे नमः॥ ॐ सद्योजा

१०

प्रपद्यामि सद्योजातायवैनमोनमः॥ भवे भवे ना
तिभवे भजस्वमां भवोद्भवायनमः॥ श्वेतांबरं श्वेत
श्वेतपुष्पैः पूजयेद्वृषवाहनं॥ सिद्धिदं सर्वकार्या
णां प्राप्तिरेव न संशयः॥ कनिष्ठांगुष्ठयोगेन सद्यो
जातकलान्यसेत्॥ ॐ ह्रां धेनुमुद्रां प्रदर्शय॥ ऋद्ध्यै
नमः॥ सिद्ध्यै नमः॥ धृत्यै नमः॥ लक्ष्म्यै नमः॥ मेधा
यै नमः॥ कांत्यै नमः॥ स्वधायै नमः॥ प्रज्ञायै नमः॥
इदमत्रचंदनं पुष्पं धूपं दीपं पयोनैवेद्यं। आच
मनं मुखवासतांबुलं॥ अथ ध्यानं॥ प्रालेयामल

बिंदु कुंद धवलं गो क्षीर फेन प्रभं त्समा न्यंग म नं
ग देह दमनं ज्वालावली लोचनं ॥ ब्रह्मेंद्रादि मरु
द्गणैः स्तुति परैरभ्यर्चितं योगिभिर्वंदेहं सक
लं कलंक रहितं स्थाणोर्मुखं पश्चिमं ॥१॥ ॐ स
द्योजातं प्रथमं ॥१॥ ॐ सर्वज्ञाय नमः नमस्का
रं ॥ वामदेवाय गुह्येन्यस्य वामदेव ऋषिः जगती
छंदः विष्णु देवता रक्तवर्णं गरुड वाहनं उत्तरा
दिक् उत्तरवक्त्र आपस्तत्त्वं ह्रीं बीजं अमृत रूपा
त्मने विष्णवे नमः ॥ ॐ वामदेवाय नमो ज्येष्ठाय

११

नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलवि
करणाय नमो बलविकरणाय नमो बलाय नमो बल
प्रमथनाय नमः सर्वभूत दमनाय नमो मनोन्मथना
य नमः ॥ तुलसीशत १ पत्रे अभ्युक्ष्य पेत्ता दर्पवाहनं ॥ पि
ष्टदोष विनाशाय प्राप्यते श्री अक्षसंपदः ॥ ॐ ह्रीं पश्चि
मुखं प्रपद्ये ॥ श्री गुह्यनाभिका योगेन वामदेवक
लां न्यसेत ॥ रजसे नमः ॥ रक्षायै नमः ॥ रत्यै नमः ॥
पाल्यै नमः ॥ कामायै नमः ॥ संजीविन्यै नमः ॥ क्रि
यायै नमः ॥ बुद्ध्यै नमः ॥ धात्र्यै नमः ॥ धात्र्यै न

मः। भ्रामर्यैनमः॥ मोहिन्यैनमः॥ जरायैनमः। इदमत्र

चंदनं पुष्पं दधिनैवेद्यं०॥ अथ ध्यानं॥ गौरं ॐ ॐ म

पिंजरं सुतिलकं व्यापांडुगंडस्थलं घ्रे विद्रेपकटाक्ष

वीक्षणलसत्संसिक्तकर्णोत्पलं। स्निग्धं बिंबफला

धरं प्रहसितं नीलालकालंकृतं वंदे पूर्णशशांकमं

डलनिभं वक्त्रं हरस्योत्तरं॥१॥ इदं विष्णुर्विचक्रमे०

विष्णुवक्त्राय नमः नमस्कारं। अघोरायहृदयेन्य

स्य अघोरेभ्य घोर ऋषिः अनुष्टुप् छंदो रुद्रो

देवता नीलवर्णं कूर्मवाहनं दक्षिणा दिक् दक्षिण

१२

वक्त्रं तेजस्तत्त्वं हूं बीजं विश्वरूपात्मने कालाग्निरूपाय

नमः॥ ॐ अघोरेभ्योथ घोरेभ्यो घोरघोरतरेभ्यः।

सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः

॥ हूं त्रिशूलमुद्रां प्रदर्श्य। नीलोत्पलैः कमवीरैः प्र

जयेत्कूर्मवाहनं। सर्वबाधाविनाशाय ज्ञानमोक्षप्र

दायकं। अंगुष्ठमेध्यमायोगेन दक्षिणवक्त्रकल्पोन्यसे

त्॥ तमसेनमः। मोहायैनमः। क्षमायैनमः। निद्रा

यैनमः। वृत्यैनमः। मायायैनमः। जरायैनमः। दु

र्गायैनमः। निवृत्यैनमः। इदमत्र चं० घृतनैवेद्यं०।

ध्यानं॥ कालाभ्रभ्रमरंजनाचलनिनं व्यावृत्ति पिं
गेक्षणं खंडेंदुद्युपनिस्सृतां सुदशं दंष्ट्रोद्भिन्नदंष्ट्राकुरं॥
सर्पप्रोतकपाल शुक्ति शकलं व्याकीर्णसिध्देश्वरं वंदे
दक्षिणमीश्वरस्यकुटिलं भ्रूभंगरौद्रं मुखं॥इमारुद्रा
य०॥ रुद्रवक्त्रायनमः नमस्कारं॥ तत्पुरुषमुखेन्य
स्पतत्पुरुषऋषि गायत्रीछंदः। सूर्यो देवता पीत
वर्णमश्ववाहनं पूर्ववक्त्रं वायुस्तत्वं ह्रौंबीजं चैतन्या

त्मने आदित्यायनमः। ॐ तत्पुरुषाय विद्महे म
हादेवाय धीमहि॥ तन्नो रुद्रः प्रचोदयात्॥ ह्रौं

ज्ञानमुद्रां प्रदर्शय॥ दुर्वांकुरैरर्कपुष्पैः पूजयेदश्व
वाहनं॥ आयुष्यं वर्द्धते तस्य चत्वारः फलदायकाः
॥ तर्जन्यंगुष्ठयोगेन तत्पुरुषकेलान्यसेत्॥ शां
त्यैनमः। विद्यायैनमः। प्रतिष्ठायैनमः। नि
वृत्यैनमः। इदम० मधुनैवेद्यं॥ ध्यानं॥ संवर्त्ता
ग्नितडित्प्रतप्तकनकः प्रस्पर्द्धितेजोरुणं गंभीर
ध्वनिनिस्सृतां सुदशनं प्रोद्भासिताम्राधरं॥ बाले
न्दुद्युतिलोलपिंगलजटाभारप्रबद्धोरगं वंदे सि
द्ध सुरासुरेः प्रणमितं पूर्वंमुखं शूलिनः॥१॥ ह्रौं

सः स्तुत्विप० ॥ पूर्ववक्त्राय नमः नमस्कारं ॥ तमीशा
नेति ईशानऋषिः अनुष्टुप्छंदः शिवो देवता जं
बुवर्णं वृषभवाहनं ऊर्ध्ववक्त्रं आकाशतत्वं हूः बीजं
अव्यक्ताय सर्वव्यापकात्मने संसत्वाय नमः ॥ ईशा
नः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपति
र्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्
॥ हूः महामुद्रां प्रदर्शय ॥ बिल्वैः कनकपुष्पैश्च पूजई
यद्वृषभवाहनं । पूजनीयः प्रयत्नेन सौख्यमोक्षप्र
दायकः ॥ शशिन्यै नमः ॥ अंगदायै नमः ॥ ईश्वा

१४

यै नमः ॥ वरीच्यै नमः ॥ ज्वालिन्यै नमः ॥ इदमर्च्यं० श
र्करानैवेद्यं० ॥ ध्यानं ॥ व्यक्ताव्यक्तगुणेतरं सुवदनं
षट्त्रिंशत्तत्वाधिकं तस्मादुत्तरतत्वमक्षयमिति ध्येय
सदा योगिभिः वंदे तामसवर्जितेन मनसा सूक्ष्मापि
सूक्ष्मं परं शांतं पंचममीश्वरस्य वदनं खव्यापितेजो
मयं ॥५॥ तमीशानं जगतस्तस्थुषस्पतिं धियंजिन्वम
वसे हूमहे वयम् ॥ पूषा नो यथा वेदसामसद्वृधे रक्षि
तापायुरदब्धः स्वस्तये ॥ ई ऊर्ध्ववक्त्राय नमः नमस्का
रं ॥ ॐ नमः शिवाय अनेन मंत्रेण धूपं दीपं नैवेद्यं० ॥

नैवेद्यांते आचमनं ॥ फलतांबूलं दक्षिणां प्रदक्षि
णां ॥ अथ जपः ॥ ॐ ह्रौं ह्रीं जूं सः ॐ नमः शिवाय प्रसन्न
पारिजाताय स्वाहा ॥ अनेन मंत्रेण अष्टोत्तरशत
जपं कुर्यात् । जपनिवेदनं गुह्यातिगुह्यगोप्ता त्वं गृ
हाणास्मत्कृतं जपं । सिद्धिर्भवतु मे देव त्वत्प्रसादा
न्महेश्वर ॥ अनेनाष्टोत्तरशतेन जपेन सांब स
दाशिवः प्रीयतां ॥ अथावर्णपूजा ॥ पूर्वादिवामाव
र्तेन ॐ शर्वाय क्षितिमूर्तये नमः ॥ ॐ भवाय जल
मूर्तये नमः ॥ ॐ रुद्राय अग्निमूर्तये नमः ॥ ॐ उग्राय

१५